दिनाङ्क :- 24.04.2026

प्रात: - 06:55

## निर्वाचन-प्रतिशतम्

पश्चिमबङ्गप्रदेशे विधानसभानिर्वाचनस्य प्रथमे चरणे स्वातन्त्र्यानन्तरं सर्वाधिकं मतदान-सहभागित्वं अभिलिखितम्, यत्र द्विसप्तति-दशमलवोत्तर द्विनवति प्रतिशतं यावत् मतदानम् अभवत्। तमिलनाडु-राज्ये अपि ह्यः चतुर्दश दशमलवोत्तर पञ्चाशिति प्रतिशतं यावत् मतदाने सहभागित्वम् अभिलिखितम्। तमिलनाडु-राज्यस्य सप्तपञ्चाशत् दशमलवोत्तर त्र्याशिति प्रतिशतं यावत् पुरुषाः, षट्सप्तति दशमलवोत्तर पञ्चाशिति प्रतिशतं यावत् महिलाः, ऊनपञ्चाशत् दशमलवोत्तर-षष्ठी प्रतिशतं यावत् च तृतीयलिङ्गीयाः च मतदानं कृतवन्तः। अत्रान्तरे, पश्चिमवङ्गस्य द्विनवति दशमलवोत्तर नवति प्रतिशतं यावत् पुरुषाः, ऊनसप्तति दशमलवोत्तर द्विनवति प्रतिशतं यावत् महिलाः, ऊनाशिति दशमलवोत्तर षड्पञ्चाशत् प्रतिशतं यावत् च तृतीयलिङ्गीयाः स्वमतस्य प्रयोगम् अकुर्वन्। अपि च गुजरात-राज्यस्य उमरेठ-मण्डलस्य उप-निर्वाचने त्रीणि दशमलवोत्तर ऊनषष्ठी प्रतिशतं यावत् मतदातारः भागं भाजितवन्तः। महाराष्ट्रस्य बारामती-मण्डले अष्टचत्वारिंशत् दशमलवोत्तर सप्तपञ्चाशत् प्रतिशतं, राहुरी-मण्डले एकत्रिंशत् दशमलवोत्तर पञ्चपञ्चाशत प्रतिशतं यावत् च मतदानम् अभवत्।

## पश्चिमबंगाल-प्रचाराभियानम्

यथा यथा पश्चिमबङ्गाल-विधानसभा-निर्वाचनं मतदानस्य द्वितीये चरणं प्रविशति, तथैव सम्पूर्णे राज्ये राजनैतिक-क्रियाकलापः तीव्रः अभवत्, यत्र प्रमुखदलानां शीर्ष-प्रचारकाः प्रचाराणि आरब्धवन्तः। प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः कृष्णानगरे मथुरापुरे च जनसभाम् अभिसंबोधयता भ्रष्टाचारस्य, प्रदेशे अवैध-प्रवेशस्य च विषये शासकदलं लक्ष्यीकृतम्। पश्चात्, प्रधानमन्त्री रामकृष्ण-मठ- मिशनेत्यस्य मुख्यालये बेलूरु-मठे च गतवान्। मुख्यमन्त्री ममता बनर्जी इत्येषा कोलकाता-नगरे प्रचारम् कुर्वन्ती आरोपितं यत् प्रधानमन्त्रिणा लोकतान्त्रिक-प्रक्रियायाः अवमूलनं कृतम् ।

## प्रधानमन्त्री मन की बात

प्रधानमन्त्री नरेन्द्र मोदी आगामि रविवासरे प्रातः एकादशवादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति । मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् त्रयस्त्रिंशत्यधिक-शत-तमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति। अयं हि कार्यक्रमः आकाशवाणी-वार्ता विभागस्य अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अपि च newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्धः भविष्यति। आकाशवाणी-दूरदर्शनवार्ता-प्रधानमन्त्री-कार्यालय-सूचना-प्रसारण-कार्यालयानां यू-ट्यूब वाहिनीभिः अपि अस्य कार्यक्रमस्य साक्षात् प्रसारणं भविष्यति । हिन्दी-भाषायां प्रसारणस्य पश्चात् अस्य प्रसारणम् आकाशवाण्या क्षेत्रीयासु भाषासु अपि भविष्यति।

**बिहार-विश्वासमतम्**

**बिहारस्य मुख्यमन्त्री साम्राट् चौधरी अद्य विधानसभायाम् एकदिवसीये विशिष्टसम्मेलनावधौ विश्वासमतं याचयिष्यति। विधानसभा-सचिवालयेन प्रसारितस्य आधिकारिक-अधिसूचनायाः अनुसारं, सत्रस्य आरम्भः प्रातः एकादशवादने भविष्यति, यस्मिन् मुख्यमन्त्रिणः विश्वास-प्रस्तावः प्रस्तूयते। सहैव सर्वेपि मन्त्रिणः विधायकाः च सभायाम् उपस्थिताः भविष्यन्ति।**

**पञ्चायती-राज-दिवसः**

**पञ्चायती-राज-मन्त्रालयः अद्य नवदेहली-नगरे राष्ट्रिय-पञ्चायती-राज्-दिवसम् आचरति। मन्त्रालयः अवदत् यत् राष्ट्रिय-कार्यक्रमस्य महत्त्वपूर्णे विषये अस्मिन् कार्यक्रमे प्रधानमन्त्रिणः नरेन्द्रमोदिनः सन्देशः पठ्यते। मंत्रालयेन अग्रे उक्तं यत्, प्रधानमन्त्रिणः सन्देशः सम्पूर्णे देशे पञ्चायती-राज्-संस्थानां, ग्रामीण-स्थानीय-निकायानां च निर्वाचित- प्रतिनिधिनां कार्यकर्तृणां च मध्ये प्रसारितः भविष्यति।**

**आई.पी.एल.**

**आई. पी. एल. क्रिकेट्-क्रीडायां गतरात्रौ मुम्बई-नगरस्य वानखेडे-क्रीडाङ्गणे चेन्नई-सूपर-किङ्ग्स-दलेन मुम्बई-इण्डियन्स-दलम् त्रयाधिकैकशत धावनान्कैः पराजितम्। तत्रैव अद्य सायं सार्द्ध सप्तवादने बेङ्गलूरु-नगरस्य एम्. चिन्नास्वामी क्रीडाङ्गणे रायल-चालॆञ्जर्स्- बेङ्गलूरु दलं गुजरात्-टायटन्स् इत्यमुं दलं सम्मुखी करिष्यति।**

**।। इति वार्ता:।।**